# 6

# अद्वैतवेदान्ते आधुनिक विज्ञानेचमायाः

**बिप्लबसरकार**
न्यायविभागः (शोधच्छात्रः)
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालयस्य
biplabs293@gmail.com

अद्वैतवेदान्ते मायाब्रह्मणः शक्तिरविद्या-अज्ञानं-प्रकृतिरित्यादिशब्दव्यपदेश्या, अनादिः, न सद्रूपा न चासद्रूपा किन्तु सदसद्भ्यामनिर्वचनीयलक्षणा, ब्रह्मणो भिन्नत्वाभिन्नत्वाभ्याञ्च अनिरूपणीया सत्त्वरजस्तमोगुणात्मिका, ज्ञानविरोधिनी जगतः परिणाम्युपादानं च। **अजामेकां लोहितशुक्लकृष्णाम्,**[1]**देवात्मशक्तिंस्वगुणैर्निगूढाम्**[2]इत्यादिश्रुतिवाक्यानि मायायाः त्रिगुणात्मकत्वं समर्पयन्ति। **मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते**[3] इत्यादिस्मृतिवाक्यानि **ब्रह्मविदाप्नोति परम्,तरति शोकमात्मवित्**[4] इत्यादीनि श्रुतिप्रमाणानि च मायायाः ज्ञाननाश्यत्वेन ज्ञानविरोधित्वप्रतिपादकानि। सच्चेन्न बाध्येत असच्चेन्न प्रतीयेत। प्रतीयमानत्वात् ज्ञानेन बाध्यत्वाच्च अनिर्वाच्यत्वमुच्यते इति अनिर्वचनीयाविद्यायां युक्तिः।

---

[1]श्वे. उ-4/5

[2]श्वे. उ-1/3

[3]भ. गी. - 7/14

[4]छा. उ.-7/1/13


Volume 5, Issue 1, 2026, p 63- 72 ISSN 2583-6331
©Indira Gandhi National Open University

वेदान्तदर्शने त्रिकालाबाध्यत्वं सत्यत्वं, मायायाः तादृशं सत्त्वं नास्ति, वन्ध्यापुत्रादिवत् अविद्यमानत्वप्रतीतिरपि न, तदेवम् अनिर्वचनीयत्वम्। चित्सुखाचार्यैः मायालक्षणमित्थं कथ्यते-

"**अनादिभावरूपं यद्विज्ञानेन विलीयते ।**
**तदज्ञानमिति प्राज्ञाः लक्षणं संप्रचक्षते**"[5]इति

अद्वैतसिद्धौ मधुसूदनसरस्वतिरेवं प्रतिपादयति-"**अनादिभावरूपत्वे सति ज्ञाननिवर्त्या सा**" इति ।

- **मायायाः भिन्ननामानि**

अद्वैतवेदान्ते अस्याः मायायाः कृते इतराणि नामान्यपि विद्यन्ते। तान्यथा –1.अविद्या, 2.मिथ्याज्ञानम्, 3.अव्यक्तं, 4.महासुषुप्तिः, 5.आकाशः, 6.अक्षरः, 7.अध्यासः, 8.अज्ञानम्, 9.प्रकृतिः, 10.शक्तिः, 11.प्रधानम् इत्यादीनि ।

1.अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रयुक्तत्वात् ।
2.मिथ्याज्ञाननिमित्तः नैसर्गिकोऽयं लोकव्यवहारः ।
3.अव्यक्ता हि माया तत्त्वान्यत्वनिरूपणाशक्यत्वात्, अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या ।
4.परमेश्वराश्रया मायामयी महासुषुप्तिः यस्यां स्वरूपप्रतिबोधरहिता शेरते संसारिणो जीवाः ।
5.तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम् ।एतस्मिन् नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च इति श्रुतेः कचिदक्षरशब्दोदितम् - अक्षरात्परतः परः इति श्रुतेः ।
6.तमेतमेर्वलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ।

---

[5]त. प्र-1/9

7.अज्ञानेनामृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।
8.सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संस्कारप्रपञ्चबीजभूते सर्वज्ञस्य ईश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ।
9.अक्षरमव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्ममीश्वराश्रयं तस्यैवोपाधिभूतम् ।
10.अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया ।
11.यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेनाव्याकृतादिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्येत परिकल्प्यताम् इति।

- **आवरणविक्षेपशक्तिद्वयवती मायाः**

मुक्तमप्यात्मानम् मायायाः द्वे शक्ती स्तः आवरणशक्तिः विक्षेपशक्तिश्च। आवरणशक्त्या नित्यं शुद्धं बुद्धं अनित्यमशुद्धमबुद्धं च मन्यते लोकः। मायायाः आवरणशक्तिद्योतकभाष्यवाक्यामित्थं-"**गूहते संवृणोति स्वरूपादि निजमाययेति गुहः नाहं प्रकाशः सर्वस्य योगमायासमाकृतः**" (विष्णुसहस्रनामभाष्यम्) विक्षेपशक्त्या जागतिकप्रपञ्चोऽयं समस्तः जायते। अनया शक्त्या अधिष्ठाने ब्रह्मणि जगत्प्रतिभासः। तदुच्यते भाष्ये-

"**माया नाम बहिरन्यथात्मानं प्रकाश्यान्यथैव कार्यं करोति सा माया**"[6]इति ।

[6]प्र. उ. शा. भा.- 1/16

**"अद्वितीयस्य परमात्मनः मायया बहुरूपत्वमुपपद्यत एवेत्यर्थः** "[7]इति च।

**"शक्तिद्वयं हि मायायाः विक्षेपावृत्तिरूपकम्।**
**विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत्।**
**अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।**
**आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्।** "[8]

- **मायायाः एकत्वमनेकत्वञ्च**

नानाजीववादिनः मण्डनमिश्रवाचस्पतिमिश्रप्रभृतयः प्रतिजीवं मूलविद्यायाः नानात्वमङ्गीकुर्वन्ति। ब्रह्मसूत्रभाष्यभामत्यां च तदेवम् अयमभिसन्धिः न वयं प्रधानवदविद्यांसर्वजीवेष्वेकामाचक्ष्महे येनैवमुपलभेमहि, किन्तु इयं प्रतिजीवं भिद्यते। तेन यस्यैव जीवस्य विद्योत्पन्ना तस्यैवाविद्यापनीयते न जीवान्तरस्य, भिन्नाधिकरणयोर्विद्याविद्ययोरविरोधात्', इन्द्रोमायाभिः पुरुरूप ईयत इत्यादिश्रुतयः मायायाः नानात्वे प्रमाणम्। अजामेकां लोहितशुक्लकृष्णाम् इत्यादिषु एकत्वव्यपदेशो जात्यभिप्रायक इति तेषां पक्षः। एकजीववादिनः, विवरणानुयायिषु केचित्, इष्टसिद्धिकारः च मायायाः एकत्वमङ्गीकुर्वन्ति। यथा- **"ब्रह्मकमेव स्वविद्यया जगदाकारेण विवर्तते स्वप्नादिवदिति मतान्तरम्, तस्मात् ब्रह्मैव स्वमायया अविद्यया विवर्तते"**[9] इत्येवम्।

---

[7]सन. सु. शा. भा. 1/21

[8]इ. वि. - 13,15

[9]प पा. विवरणम्, प्र. वर्णके पृ.-97 तथा 99,,तत्र तात्पर्यदीपिका तत्त्वदीपनम् च सप्तमं पु. स. -693


©Indira Gandhi National Open University

लघुयोगवासिष्ठे अविद्यायाः भिन्ननामानि इत्थं दृश्यन्ते यथा-

**"असतैव सती तापनद्यैव लहरी चला।**
**मनसैवेन्द्रजालश्रीर्जागती प्रवितन्यते।"[10]**
**"अविद्यासंसृतिर्मोहो बन्धो माया मलं तमः ।**
**कल्पितानीति नामानि तस्याः सकलेवदिभिः '।[11]**

अविद्यासंसृतिः, मोहः बन्धः, माया, मलं, तमः इत्यादीनि जगत्सम्बन्धिन्याः इन्द्रजालश्रियः कल्पितानि नामानीत्यर्थः। तस्याश्च मायायाः सदसद्भ्याम् अनिर्वचनीयत्वम् असतैव सती इत्यनेन अंशेन ज्ञाप्यते।

अद्वैतसिद्धौ बालबोधिन्याम् अपि मायायाः बन्धः इति नाम दृश्यते वार्तिकोद्धृतं यथा- **"सा चबन्ध उदाहृतः इति वार्तिकात् बन्धस्य अविद्यारूपत्वात् प्रमातृत्वादेर्बन्धत्वेऽपि तस्य आविद्यकत्वात् आविद्यकबन्धेन ब्रह्मणो न स्वरूपहानम्"**[12]इति।

**"क्वचिन्मनः क्वचिद्बुद्धिः क्वचिज्ज्ञानं क्वचित्क्रिया।**
**क्वचिदेवेत्यहंकारः क्वचित्पुर्यष्टकं स्मृतम् '।[13]**
**"क्वचित्प्रकृतिरित्युक्तं क्वचिन्मायेति कल्पितम्।**
**क्वचिन्मलमिति प्रोक्तं क्वचित्कर्मेति संस्थितम्।"[14]**
**"क्वचिद्बन्ध इति प्रोक्तं क्वचिच्चित्तमिति स्फुटम्।**

---

[10]ल. यो. वा. 3/1/09
[11]ल. यो. वा. 3/1/20
[12]अ. सि. पु. सं.-.1061
[13]ल. यो. वा. 4/4/57
[14]तत्रैव 4/4/58


Volume 5, Issue 1, 2026, p 63- 72 ISSN 2583-6331
©Indira Gandhi National Open University

**प्रोक्तं क्वचिदविद्येति क्वचिदिच्छेति सम्मतम् '।[15]**

मनः, बुद्धिः, इत्यादिरूपेण मायैव नानात्वं प्रतिपद्यते। अतः सैव मनः, बुद्धिः, वृत्तिज्ञानं, क्रिया, अहंकारः, पुर्यष्टकम्, प्रकृतिः, माया, मलं, कर्म, बन्धः, चित्तं, अविद्या, इच्छा इत्यादिनामभिः व्यवह्रियते। क्वचित्कार्यत्वेन क्वचित्कारणत्वेन इति समीक्षा।

**"मायामन्त्रमयः प्रोक्तो यः पुमान् रघुनन्दनः।**
**एनं च त्वमहंकारं विद्धि शून्याम्बरोत्थितम्।"[16]**
**"यस्मिन्नाकाशकोशेऽस्मिन् साधो जगदिदं स्थितम्।**
**तदनन्तमसच्छून्यं सर्गादौ तिष्ठति स्वयम्।**
**तस्मादुदेत्यहंकारः पूर्वस्पन्द इवानिलात् '।[17]**

अत्र माया शून्याम्बरः, आकाशः इत्याभ्यां नामभ्यां उल्लिख्यते। सर्गादौ स्वयं तिष्ठति इत्यनेन इयं माया अजा इति च ज्ञाप्यते। तस्मादुदेत्यहंकारः पूर्वस्पन्द इवानिलात् इत्यत्र स्तिमितवायुः माया, अहंकारः तस्याः प्रथमस्पन्दः इति स्फष्टितम्।

**"अत्मन्येवात्मना व्योम्नि यथा सरति मारुतः।**
**तथात्मा स्वात्मशक्त्यैव स्वात्मन्येवैति लोलताम्।"**

अत्र माया आत्मशक्तिरिति उक्ता। मारुतः व्योम्नि यथा तथा माया आत्मनि तिष्ठति। आत्मानमेवाश्रयते इत्यर्थः। मायायाः अधिष्ठानान्तरं नास्तीत्यर्थः। कालिका तनुतामेति इत्यत्र कालिकेति, चिच्छक्तिश्चिन्महार्णवे इत्यत्र चिच्छक्तिरिति,

[15]तत्रैव 4/4/59

[16]तत्रैव 6/1/25

[17]ल. यो. वा. 6/1/26


©Indira Gandhi National Open University

संविच्छक्तिचमत्कृति इत्यत्र संविच्छक्तिरिति च मायैव भिन्ननामभिः सूच्यते वासिष्ठे।

**गुरूदेवार्पणमस्तु ।**

## परिचालितग्रन्थसूची –


१. चित्सुखाचार्यः , **तत्त्वप्रदीपिका**, सम्पा. श्री.प.रघुनाथशास्त्रीभिः , चौखम्वा प्रकाशन, वाराणसी2000

२. अनुवाद शाङ्करभाष्यसहित, **छान्दोग्योपनिषदः** , प्रका. गीताप्रेस, गोरखपुर.

३. अनुवाद शाङ्करभाष्यसहित, **श्वेताश्वतरोपनिषदः** , प्रका. गीताप्रेस, गोरखपुर.

४. अनुवाद.श्रीहरिकृष्णदास गोयन्दका, शाङ्करभाष्यहिन्दिअनुवादसहित, **श्रीमद्भागवद्गीता**, प्रका. गीताप्रेस, गोरखपुर.

५. **श्रीमद्भागवद्गीता**, प्रका. गीताप्रेस, गोरखपुर.

६. शाङ्करभाष्यसमेता, **प्रश्नोपनिषत्**, प्रका. गीताप्रेस, गोरखपुर.


*****


©Indira Gandhi National Open University